# ।। सुस्वागतम् ।।

प्रस्तोता –
श्री सत्यव्रतपाण्डेयः
प्राध्यापकः
महर्षि पाणिनि संस्कृत एवं वैदिकविश्वविद्यालय

॥ श्री गणेशाय नमः॥

# अर्थसङ्ग्रहः

## मङ्गलाचरणम्

वासुदेवं रमाकान्तं नत्त्वा लौगाक्षिभास्करः ।
कुरुते जैमिनिनये प्रवेशायार्थसङ्ग्रहम् ॥१॥

# (२) तन्त्रारम्भकसूत्रावतरणम्

अथ परमकारुणिको भगवान् जैमिनिर्धर्मविवेकाय द्वादशलक्षणीं प्रणिनाय (प्रणिनीय)।

तत्रादौ धर्मजिज्ञासां सूत्रयामास 'अथातो धर्मजिज्ञासे'ति (जै. सू.१.१.१)।

अत्राथ शब्दो वेदाध्ययनानन्तर्यवचनः। अतः शब्दो हि वेदाध्ययनस्य दृष्टार्थत्वं ब्रूते ।।२।।

# (३) धर्मविचारशास्त्रस्यावश्यकता

‘स्वाध्यायोऽध्येतव्यः’ (श. प. ब्रा.११.५.७.२) इत्यध्ययनविधौ तदध्ययनस्यार्थज्ञानरूपदृष्टार्थकत्वेन व्यवस्थापनात्।

तथाच वेदाध्ययनानन्तरं यतोऽर्थज्ञानरूपदृष्टार्थकं तदध्ययनमतो हेतोर्धर्मस्य वेदार्थस्य जिज्ञासाकर्तव्येतिशेषः ।

जिज्ञासापदस्य विचारे लक्षणा अतो धर्मविचारशास्त्रमिदमारम्भणीयमिति शास्त्रारम्भसूत्रार्थः।।३।।

# (४) धर्मलक्षणप्रश्नः

अथ को धर्मः , किं तस्य लक्षणमिति चेदुच्यते – यागादिरेव धर्मः ।

तल्लक्षणं वेदप्रतिपाद्यः प्रयोजनवदर्थो धर्म इति ।

प्रयोजनेऽतिव्याप्तिवारणाय प्रयोजनवदिति ।

भोजनादावतिव्याप्तिवारणाय वेदप्रतिपाद्य इति ।

अनर्थफलकत्त्वादनर्थभूते श्येनादावतिव्याप्तिवारणायार्थ इति ।।४।।

# (५) वेदस्य धर्मप्रतिपादकत्वम्

न च 'चोदनालक्षणोऽर्थो धर्म' (जै. सू.१.१.२)इति सौत्रतल्लक्षणविरोधः , चोदनापदस्य विधिरूपवेदैकादेशपरत्वादिति वाच्यम् ।

तत्रापि चोदनाशब्दस्य वेदमात्रपरत्वात् ।

वेदस्य सर्वस्य धर्मतात्पर्यवत्त्वेन धर्मप्रतिपादकत्वात् ॥५॥

# (६) यजेतेत्यत्रास्त्यंशद्वयम्

स च यागादिर्यजेत स्वर्गकाम इत्यादिवाक्येन स्वर्गमुद्दिश्य पुरुषं प्रति विधीयते ।

तथाहि । यजेतेत्यत्रास्त्यंशद्वयं यजिधातुः प्रत्ययश्च ।

प्रत्ययेऽप्यस्त्यंशद्वयमाख्यातत्वं लिङ्त्वं च ।

तत्राख्यातत्वन्दशलकारसाधारणं लिङ्त्वं पुनर्लिङ्मात्रे ॥६॥

# (७) भावनाविचारः

उभाभ्यामप्यंशाभ्यां भावनैवोच्यते । भावना नाम भवितुर्भवनानुकूलो भावयितुर्व्यापारविशेषः।

सा द्विधा । शाब्दीभावना आर्थीभावना चेति ।।७।।

# (८) शाब्दीभावना

तत्र पुरुषप्रवृत्यनुकूलो भावयितुर्व्यापारविशेषः शाब्दीभावना।
सा च लिङ्गंशेनोच्यते। लिङ्श्रवणेऽयं माम्प्रवर्तयति
मत्प्रवृत्यनुकूलव्यापारवानयमिति नियमेन प्रतीतेः।
यद्यस्माच्छब्दान्नियमतः प्रतीयते तत्तस्य वाच्यम्। यथा
गामानायेत्यस्मिन्वाक्ये गोशब्दस्य गोत्वम्॥८॥

# (९) शाब्द्या लौकिकवैदिकभेदौ

स च व्यापारविशेषो लौकिकवाक्ये
पुरुषनिष्ठोऽभिप्रायविशेषः।
वैदिकवाक्ये तु पुरुषाभावाल्लिङ्गादिशब्दनिष्ठ एव।
अत एवशाब्दीभावनेति व्यवह्रियते।।९।।

# (१०) शब्दभावनाया अंशत्रयम्

सा च भावानांशत्रयमपेक्षते । साध्यं साधनमितिकर्तव्यताञ्च। किम्भावयेत् केन भावयेत् कथं भावयेत् इति । तत्र साध्याकाङ्क्षायां वक्ष्यमाणांशत्रयोपेता आर्थीभावना साध्यत्वेनान्वेति । एकप्रत्ययगम्यत्वेन समानाभिधानश्रुतेः । संख्यादीनामेकप्रत्ययज्ञात्वेऽ प्ययोग्यत्वान्नसाध्यत्वेनान्वयः। साधनाकाङ्क्षायां लिङ्गादिज्ञानं करणत्वेनान्वेति । तस्य च करणत्वं न भावनोत्पादकत्वेन, तत्पूर्वमपि तस्याः शब्दे सत्वात् । किन्तु भावनाज्ञापकत्वेन, शब्दभावनाभाव्यनिर्वर्तकत्वेन वा । इतिकर्तव्यताकाङ्क्षायामर्थवादज्ञाप्यप्राशस्त्यमितिकर्तव्यतात्वेनान्वेति ।।१०।।

# (११) आर्थीभावनालक्षणम्

प्रयोजनेच्छाजनितक्रियाविषयव्यापार आर्थीभावना । सा चाख्यातत्वांशेनोच्यते । आख्यातसामान्यस्य व्यापारवाचित्वात् ।।११।।

# (१२) आर्थीभावनाया अंशत्रम्

साप्यंशत्रयमपेक्षते साध्यं साधनमितिकर्तव्यताञ्च । किम्भावयेत् केन भावयेत् कथं भावयेत् इति । तत्र साध्याकाङ्क्षायां स्वर्गादिफलं साध्यत्वेनान्वेति । साधनाकाङ्क्षायां यागादिः करणत्वेनान्वेति । इतिकर्तव्यताकाङ्क्षायां प्रयाजाद्यङ्गजातमितिकर्तव्यतात्वेनान्वेति ।।१२।।